पाद्मोत्तरखण्डे ।
"तापादिपञ्चसंस्कारी नवेज्याकर्म्मकारकः ।
अर्थपञ्चकविद्विप्रो महाभागवतो हि सः ॥
एकान्तेन सदा विष्णौ यस्माद्देवे परायणाः ।
तस्मादेकान्तिनः प्रोक्तास्तद्भागवतचेतसः ॥"
एकादशस्कन्धे ।
"ज्ञात्वाज्ञात्वाथ ये वै मां यावान् यश्चास्मि
यादृशः ।
भजन्त्यनन्यभावेन ते वै भागवता मताः ॥
न कामकर्म्मबीजानां यस्य चेतसि सम्भवः ।
वासुदेवैकनिलयः स वै भागवतोत्तमः ॥"
स्कान्दे ।
"यस्य तच्छ्रुतस्यापि केशवे रमते मनः ।
न विच्युता च भक्तिर्वै स वै भागवतो नरः ॥
आपन्नस्य यस्येह भक्तिरव्यभिचारिणी ।
नान्यत्र रमते चित्तं स वै भागवतो नरः ॥"
हरियोगेश्वरोत्तरे ।
"विसृजति हृदयं न यस्य साक्षा-
द्धरिरवशाभिहितोऽप्यघौघनाशः ।
प्रणयरसनया धृताङ्घ्रिपद्मः
स भवति भागवतप्रधान उक्तः ॥"
मध्यममाह तत्रैव ।
"ईश्वरे तदधीनेषु वालिशेषु द्विषत्सु च ।
प्रेममैत्रीकृपोपेक्षा यः करोति स मध्यमः ॥"
कनिष्ठस्तत्रैव ।
"अर्च्चायामेव हरये पूजां यः श्रद्धयेहते ।
न तद्भक्तेषु चान्येषु स भक्तः प्राकृतः स्मृतः ॥"
इति श्रीहरिभक्तिविलासे १० विलासः ॥

भागिकं, त्रि, (भाग + "भागाद्यच्च ।" ५।१।४६। इति पक्षे ठन् ।) वृद्ध्यर्थदत्तमुद्रादि । सुदी टाका इत्यादि भाषा । यथा । भागो वृद्ध्यादिरस्मिन् दीयते भाग्यं भागिकं शतम् । भाग्या भागिका विंशतिः । इति सिद्धान्तकौमुदी ॥

भागिनेयः, पुं, (भगिन्या अपत्यम् । भगिनी + "स्त्रीभ्यो ढक् ।" ४ । १ । १२० । इति ढक् ।) भगिनीपुत्त्रः । तत्पर्य्यायः । स्वस्रीयः २ । इत्यमरः । २ । ६ । ३२ ॥ स्वस्रियः ३ । इति शब्दरत्नावली ॥ स च मुख्यप्रतिनिधिः । यथा,—
"ऋत्विक् पुत्त्रो गुरुर्भ्राता भागिनेयोऽथ
विट्पतिः ।
एभिरेव हुतं यत्तु तद्धुतं स्वयमेव हि ॥"
इति तिथ्यादितत्त्वम् ॥ * ॥
तस्यावश्यपोष्यत्वम् यथा,—
"पितृव्यगुरुदौहित्रान् भर्त्तुः स्वस्रीयमातुलान् ।
पूजयेत् कव्यपूर्त्ताभ्यां वृद्धानाथातिथीन् स्त्रियः ॥"
इत्यपुत्त्रधनाधिकारे दायभागः ॥ * ॥
भागिनेयदत्तककरणं शूद्रस्यैव न तु द्विजानाम् । यथा, दत्तकचन्द्रिकायां शौनकवचने ।
"दौहित्रो भागिनेयश्च शूद्रैस्तु क्रियते सुतः ।
ब्राह्मणादित्रये नास्ति भागिनेयः सुतः क्वचित् ॥"
तन्मरणे मातुलस्य पक्षिणशौचम् । यथा ।
"पक्षिणी योनिसम्बन्धे बान्धवेषु तथैव च ।
योनिसम्बन्धे मातृष्वस्रीयपितृष्वस्रीयभागिनेयेषु ।
मातुलमरणे भागिनेयस्यापि पक्षिणशौचम् ।"
इति शुद्धितत्त्वम् ॥

भागिनेयी, स्त्री, (भगिनी + ढक् । स्त्रियां ङीप् ।) भगिन्याः स्त्र्यपत्यम् । भाग्नी इति भाषा । भगिनीशब्दात् स्त्र्यपत्यार्थे ढेये स्त्रियां ङीप्-प्रत्ययनिष्पन्ना । इति व्याकरणम् ॥

भागीरथी, स्त्री, (भगीरथस्येयम् । भगीरथ + अण् । ङीप् ।) गङ्गा । इत्यमरः । १ । १० । ३१ ॥ पृथिव्यां तस्यावतरणम् । यथा,—
सूत उवाच ।
"ततो भगीरथो राजा तपः परमदुस्तरम् ।
कृत्वा सन्तोषयामास उमाकान्तं महेश्वरम् ॥
धारणायानुमत्वा तं जगाम ब्रह्मणोऽन्तिकम् ।
ततो भगीरथः प्राह गङ्गा ब्रह्मन् ! विसृज्यताम् ॥
स तच्छ्रुत्वा वचस्तस्य सम्मान्य विबुधप्रियम् ।
गङ्गां प्रस्थापयामास सापतद्ब्रह्मणोऽन्तिकात् ॥
वायुना प्रेर्य्यमाणापि आकाशपथगा नदी ।
विख्याताकाशगङ्गेति तत्र संसेविता गजैः ॥
विष्णोः पदं समायाता तस्माद्विष्णुपदीति सा ।
पूज्यमाना सुरैः सिद्धैर्मुनिविद्याधरोरगैः ॥
सुरालयमनुप्राप्ता तस्माद्देवनदी तु सा ।
तस्मात् प्रपतिता गङ्गा शम्भोः शिरसि संस्थिता ॥
धृतैकेनैव तेनापि शम्भुना योगमायया ।
दिव्यं वर्षशतं साग्रं पुनराराधितेन वै ॥
मुक्ता भगीरथेनैव मलहन्त्री विनिर्गता ।
जटाजूटात् पपातोर्व्वां मेरोस्तस्मात्ततोऽगमत् ॥
देवैः परिवृता गङ्गा हेमकूटञ्च पर्व्वतम् ।
मन्दरञ्चैव कैलासं हिमवन्तञ्च पर्व्वतम् ॥
तामायान्तीं तु रोधाय स्वलीनो नाम दानवः ।
पार्व्वतं रूपमास्थाय वर्णाणान्तु शतैर्द्विजाः ॥
ततो भगीरथो राजाराधयामास कौशिकम् ।
स तुष्टः प्रददौ नागं वाहनं वै भगीरथः ॥
तमारुह्यागमत्तत्र यत्र रुद्धा भगीरथी ।
तेन नागेन तं दैत्यं संविदार्य्य न सङ्गतः ॥
शतधा तां समाधाय सृद्धन्यैरावणो गजः ।
महीतलं समापेदे स यावन्नागसाह्वयम् ॥
तस्माद्व्याघटनाद्विप्रा अभून्नागपुरं वरम् ।
प्लावयन्ती महीं गङ्गा जह्नोराश्रममभ्यगात् ॥
तां दृष्ट्वाथ पपौ सोऽपि प्रहृत्या कुपितो मुनिः ।
जह्नुना नाशितां दृष्ट्वा गङ्गां त्रिपथगां नदीम् ॥
सशोकस्तोषयामास जह्नुं भगीरथो मुनिम् ।
मुमोच कर्णरन्ध्रेण गङ्गा स दक्षिणेन ताम् ॥
एतस्माज्जाह्नवी भूता सुता तस्य मुनेस्तथा ।
ततः सा विविधान् देशान् पर्व्वतांश्च तथा-
श्रमान् ॥
संप्लाव्य वारिणा भूयो जगाम पूर्व्वसागरम् ॥
यत्र तत्रोदकं तस्थौ तस्याः पुण्यमभूद्द्विजाः ।
सुतीर्थं सर्व्वमर्त्यानां तारणं पापनाशनम् ॥
ततः सम्पूरयामास समुद्रं सर्व्वतो दिशम् ।
प्रपन्नं सागरैः सर्व्वं ततः पातालमाविशत् ॥
सागराणां ततोऽस्मात् संप्लाव्य वारिणा ततः ।
देवैः संपूज्यमानापि जगाम ब्रह्मणोऽन्तिकम् ॥
जग्मुस्ते सागराः स्वर्गं ब्रह्मणोपहताश्च ये ।
रथकास्ते विनिर्द्दिष्टा गङ्गाया ब्रह्मणा स्वयम् ॥
भवद्भिरनिशं नॄणां कर्त्तव्यं विघ्ननाशनम् ॥
सूत उवाच ।
एतद्वः कथितं सर्व्वं यथावतरणं दिवः ।
गङ्गायाश्चैव माहात्म्यं श्रूयतां गदतो मम ॥"
इत्याद्ये वह्निपुराणे गङ्गावतरणनामाध्यायः ॥
तस्या मुख्यनामानि यथा,—
वराह उवाच ।
"धर्म्मस्तु द्रवरूपेण ब्रह्मणा निर्म्मितः पुरा ।
यदेव गङ्गेति विख्याता शृणु स्तोत्रं वसुन्धरे ! ॥
किन्तैर्नामसहस्रैस्तु मुख्यामुख्यैः सुविस्तरैः ।
यानि नामानि मुख्यानि तानि वक्ष्याम्यनुक्रमात् ॥
गङ्गा भागीरथी पुण्या जाह्नवी सुरनिम्नगा ।
विष्णुपादाब्जसम्भूता शम्भोः शिरसि संस्थिता ॥
सुमेरुशृङ्गसंस्पृष्टा हिमाचलकृताश्रया ।
शङ्खकुन्देन्दुधवला महापातकनाशिनी ॥
नदीश्वरी त्रिपथगा वैष्णवी सुरसुप्रिया ।
धर्म्मद्रवी भोगवती विन्ध्यपाषाणदारिणी ॥
क्षमा शान्तिः प्रजाशान्तिः पुण्यदा पूतिका
शिवा ।
महानदी शतमुखी शुक्ला मकरवाहिनी ॥
ब्रह्महस्तात् परिभ्रष्टा सौम्यरूपातिशोभना ।
मुनिभिः पूजिता सर्व्वैः सर्व्वैर्देवैर्नमस्कृता ॥
महायज्ञमयी देवी मर्त्यानामुपकारिणी ।
सर्व्वत्र दुर्लभा गङ्गा त्रिभिः स्थानैर्विशेषतः ॥
गङ्गाद्वारे प्रयागे च गङ्गासागरसङ्गमे ॥
इदं स्तोत्रं मया ख्यातं पूर्व्वमुक्तं स्वयम्भुवा ।
यः पठेत् प्रातरुत्थाय तस्य नश्यति दुर्गतिः ॥
यत् पापं यौवने बाल्ये कौमारे वार्द्धके च यत् ।
तत् सर्व्वं विलयं याति तोयस्थं लवणं यथा ॥
कीर्त्तिं प्रीतिं महालक्ष्मीमायुरारोग्यसन्ततिम् ।
ददाति जाह्नवी तुष्टा सर्व्वभावेन माधवि ! ॥"
इति वाराहे सर्व्वपापप्रशमनगङ्गास्तवः ॥
अपि च ।
ब्रह्मोवाच ।
"श्रोतुमिच्छामि देवेश ! लक्ष्मीकान्त ! जगत्
प्रभो ! ।
विष्णो ! विष्णुपदीस्तोत्रं पापघ्नं पुण्यकारणम् ॥
श्रीनारायण उवाच ।
शिवसंगीतसंमुग्ध श्रीकृष्णाङ्गद्रवोद्भवाम् ।
राधाङ्गद्रवसंयुक्तां तां गङ्गां प्रणमाम्यहम् ॥
या जन्मसृष्टेरादौ च गोलोके रासमण्डले ।
सन्निधाने शङ्करस्य तां गङ्गां प्रणमाम्यहम् ॥
गोपैर्गोपीभिराकीर्णैः शुभे राधामहोत्सवे ।
कार्त्तिकीपूर्णिमाजातां तां गङ्गां प्रणमाम्यहम् ॥
कोटियोजनविस्तीर्णा दैर्घ्ये लक्षगुणा ततः ।
समावृता या गोलोकं तां गङ्गां प्रणमाम्यहम् ॥
षष्टिलक्षयोजनां या ततो दैर्घ्ये चतुर्गुणा ।
समावृता या वैकुण्ठं तां गङ्गां प्रणमाम्यहम् ॥
त्रिंशल्लक्षयोजना या ततो दैर्घ्ये चतुर्गुणा ।